International Journal of Multidisciplinary Horizon

ISSN: **3049-2017**
IJMH 2026; 3(4): 127-129
© 2026 IJMH
www.themultijournal.com
Received: 15-07-2026
Accepted: 12-08-2026
Publish : 13-08-2026

**PRANAB MAITY**
Research Scholar,
Dept. of Sahitya,
National Sanskrit University,
Tirupati, Andhra Pradesh

**Correspondence:**
**PRANAB MAITY**
Research Scholar,
Dept. of Sahitya,
National Sanskrit University,
Tirupati, Andhra Pradesh

# मृच्छकटिके दारिद्र्यवर्णनम्

**PRANAB MAITY**

**सारांशः -**

कविना शूद्रकेण विरचिते मृच्छकटिकमिति प्रकरणे तत्कालीनसमाजे निवसितानां दारिद्र्याव-स्थोपेतमनुष्याणां या स्थितिः सा स्थितिरत्र चारुदत्ताख्यनायकमाध्यमेन स्वकविप्रतिभया वर्ण्यते। चारुदत्तस्य मतेन धनाभावे तावद्दुःखं न जायते यावन्निर्धने मित्राभावे सति जायते। दारिद्र्यान्मरणं श्रेयः क्षणिकक्लेशत्वात्। पूजापरिणयादिमाङ्गलिककर्मसु अतिथिरूपेण निमन्त्रिता धनिकगृहं प्राप्ता निर्धनाः तैर्धनिकैः पुनः अवमानसहितेनावलोक्यन्ते। भाग्यपङ्क्तिवत् सुखदुःखयोरपि मानवजीवने चक्रारपङ्क्तिरिव परिवर्तितत्वात् सुखान्यनुभूय दुःखं, दुःखान्यनुभूय सुखं चानुभवन्ति मानवाः। निर्धनत्वाच्चारुदत्तस्य बान्धवाः कुटुम्बजनाश्च विपत्सु तं परित्यज्य कथं दूरं गताः किञ्च, धनिकाः दारिद्र्ये षु स्वदोषान् पातयन्तः सुखेन जीवनं यापयन्ति इत्यादिवषया यथोपयुक्तरीत्या कविनात्र विश्लेषिताः। अपरञ्च, शास्त्रप्रतिपादितपञ्चमहापातकेषु दारिद्र्यं षष्ठं महापातकमिति नूतनं चिन्तनं कवेरत्र प्राप्यते। चारुदत्तस्य दारिद्र्ये सत्यपि वसन्तसेनया संस्थापितोऽलङ्कारस्तेन रक्षित इति तस्य सद्गुणानां परिचयो दरीदृश्यते।

**कूटशब्दाः -**
**प्रकरणम्, दारिद्र्यम्, धनम्, उदारता, महापातकम्, सुखम्, अवज्ञा।**

**उपोद्घातः -**

**"अर्थ एव प्रधान इति कौटिल्यः। अर्थमूलौ हि धर्मकामाविति"**[1] – इत्यर्थशास्त्रनिष्णातकौटिल्यवचनात् धर्मार्थकाममोक्षेष्वर्थस्य प्राधान्यात् स एवादौ अर्जनीयः। समाजे दारिद्र्योपेता मनुष्या धनिकैर्भृशं तिरस्क्रियन्ते निर्धनत्वात्। सम्प्रत्यर्थपिपासवो धनिकाः प्रभावशालिनो व्यापारिणश्च स्वकीयबलेन दरिद्रान् पीडयित्वा स्वस्वार्थसिद्धिं पूरयन्ति, येन धनिका धनिकतराः, दरिद्राश्च दरिद्रतरा भवन्ति। निर्धनानां स्वकीयसिद्धान्ताः दरिद्रेतरैर्धनिकैर्नाङ्गीक्रियन्ते मूल्यहीनत्वात्। जगत्यस्मिन् कर्मनिरता मनुष्याः सुखोपभोगाय, परिवारपोषणाय, स्वकुटुम्बजनपालनाय च स्वकर्मसु मग्नाः धनम् अर्जयित्वा सुखेन जीवनं यापयन्ति। येषां कृते धनम् अर्जयन्ति मनुष्याः, परं कदाचिद्धनाभावाद्दारिद्र्याद्वा तैः परिवारजनैः कुटुम्बजनैश्च तेऽवमन्यन्ते। दारिद्र्यं न केवलं जनानां जीवने आर्थिकसंकटं गमयति, अपितु सामाजिकपारिवारिकसम्बन्धानां यथार्थस्वरूपमपि ज्ञापयति। आर्थिकस्थितौ क्षीणायां कुटुम्बानां बन्धुजनानाञ्च व्यवहारे परिवर्तनं दरीदृश्यते। अर्थे सति मनुष्या मित्रैर्बन्धुजनैश्च सह समाजे पण्डितपरिचयं लभन्ते। महाभारतप्रमाणं ह्यत्र –

> **"यस्यार्थास्तस्य मित्राणि यस्यार्थास्तस्य बान्धवाः।**
> **यस्यार्थाः स पुमाँल्लोके यस्यार्थाः स च पण्डितः"**॥[2] इति।

**ग्रन्थपरिचयः -**

> **"भवेत्प्रकरणे वृत्तं लौकिकं कविकल्पितम्।**
> **शृङ्गारोऽङ्गी नायकस्तु विप्रोऽमात्योऽथवा वणिक्"**॥[3]

इति मनसि निधाय द्विजमुख्यतमेन द्विरदेन्द्रगतिना चकोरनेत्रेण तत्रभवता शूद्रकेण दशाङ्कसमेतं शृङ्गाररसोपेतं स्वकल्पिताश्रितं मृच्छकटिकमिति प्रकरणं व्यरचि। **"नामकार्यं नाटकस्य गर्भितार्थ-प्रकाशनम्"**[4] - नाटकशब्दस्यात्र दृश्यकाव्यसम्बन्धितरूपके प्रयुक्त-त्वात् मृत्तिकया निर्मितं शकटं मृच्छकटिकम्, मृदो मृत्तिकायाः शकटिका क्षुद्रं शकटं वा यस्मिन्नाटके तन्मृच्छकटिकमिति नामकरणं सफलं याति।

कविना उज्जयिनीनिवासिनो धीरप्रशान्तस्य द्विजसार्थवाहस्य चारुदत्ताख्यनायकस्य, वेश्याया वसन्तसेनायाश्च मधुरप्रेमवर्णनं स्वप्रतिभया सूक्ष्मरीत्या च प्रकरणेऽस्मिन् विश्लेषितम्। विदूषक-धूता-रोहसेन-शकार-चेट-विटादीनां च प्रकरणस्थपात्राणां संलापो नाटकी-यदृष्ट्या यथोपयुक्तरीत्या च वर्णितोऽत्र। मृच्छकटिके तत्कालीन-मध्यवर्गीयहिन्दुसमाजस्य वास्तविकं चित्रं वरीवर्त्ति। मध्यवर्गीय-समाजे धनस्य कियती महत्यावश्यकता अर्थात् अर्थाभावे तेषां जायमाना अवस्थात्र वर्णिता। एवञ्च प्रकरणस्यास्य नायकरूपेण चारुदत्ताख्यः कश्चन साधारणमानवश्चिकीर्षितः कविना।

**दारिद्र्यवर्णनम् -**

यदा मनुष्याणां जीवने भोजनं, वस्त्रम्, आश्रयः, शिक्षा, चिकित्सा चेत्येतेषाम् आवश्यकतत्त्वानां पूर्तये पर्याप्तं धनं न भवति तदा सा स्थितिर्दारिद्र्यमित्युच्यते। न केवलं सकृन्निर्दिष्टकारणादपितु अर्थनैतिक-सामाजिक-राजनैतिकरूपपुष्कलकारणाच्च दारिद्र्यम् उत्पद्यते। किञ्च, सम्पदपेक्षया जनसंख्याधिक्यात्, कर्मसंस्थानाभावात्, प्राकृतिकदुर्योगाच्च दारिद्र्यं प्रादुर्भवति। शूद्रको मृच्छकटिकमिति प्रकरणस्य वाणिज्यकारिब्राह्मणस्य धनिकावस्थातो दरिद्रावस्थां प्राप्तस्य चारुदत्ताख्यनायकस्य दरिद्रदशां वर्णयति । पुत्ररहितस्य जनस्यैश्वर्योपेतत्वादपि भवनं रिक्तं प्रतिभाति, चित्तप्रफुल्लताभावात् कुलमर्यादा-विनाशत्वाच्च। सन्मित्राभावे जनस्य चिरजीवनं क्लेशाय कल्पते, सुखदुःखयोर्विपदि च छायेव मार्गदर्शनाभावात्। आत्मनः सर्वविधज्ञानरहितत्वात् सर्वविधयोग्यताभावाच्च मूर्खस्य सर्वा दिशः शून्याः। दरिद्रस्य निर्धनस्य वा जनस्य सर्वं जगदिदं शून्यमयं प्रतिभाति, धनाभावे तस्य आनन्दा नोत्पद्यन्ते, समाजे अपमानितः सन् सर्वदैव संघर्षं करोति। तथाहि निगदितम् –

**"शून्यमपुत्रस्य गृहं चिरशून्यं नास्ति यस्य सन्मित्रम्।**
**मूर्खस्य दिशः शून्याः सर्वं शून्यं दरिद्रस्य"॥**[5]

**(क) दारिद्र्यान्मरणम् अल्पक्लेशकरम् -**

चारुदत्तस्य पूर्वं प्रभूतधनत्वात्, परोपकाराय निर्धनेभ्यो दरिद्रेभ्यः, कुटुम्बजनेभ्यश्च सर्वं धनं निःस्वार्थतया प्रदाय निर्धनतां प्राप्तः। कविः शूद्रको नायकचारुदत्तस्य दरिद्रावस्थां तेनैव नायकमुखेन वर्णयति –

**"सुखं हि दुःखान्यनुभूय शोभते**
**घनान्धकारेष्विव दीपदर्शनम्।**
**सुखात्तु यो याति नरो दरिद्रतां**
**धृतः शरीरेण मृतः स जीवति"॥**[6]

सुखदुःखे मनुष्यजीवने चक्रारपङ्क्तिरिव परिवर्तेते। गाढतिमिरेषु दीपप्रकाशे सर्वं वस्तु यथा प्रकाश्यते तथा दुःखं कष्टम् अनुभूय सुखम् आनन्दो रराजते। मनुष्यस्य सुखोपभोगात्परं दरिद्रोपेतदुःखं प्राणसत्त्वेऽपि निष्प्राणवते कल्पते। दरिद्रमरणयोर्मरणस्याल्पक्लेश-करत्वं क्षणिकत्वात्, दारिद्र्यस्य च दुःखदायकहेतुत्वा-न्मरणावधि दुःखं जनयतीति **"मरणाद्दारिद्र्याद्वा कतरत्ते रोचते"**[7] – इति विदूषकेण मैत्रेयेण पृष्टस्य प्रश्नस्योत्तरं चारुदत्तेन यथोचितविवेचनपूर्वकं प्रदत्तम्। अतः सम्पत्तिष्वहंकारो वर्जनीयः, विपत्सु धैर्यं न त्यक्तव्यम्, कालक्रमेण तयोरावर्तत्वात्। तथाहि सुभाषितम् –

**सुखस्यानन्तरं दुःखं दुःखस्यानन्तरं सुखम्।**
**चक्रवत्परिवर्तन्ते दुःखानि च सुखानि च॥**[8] इति।

**(ख) निर्धनता सर्वापदाम् आस्पदम् -**

संसारेऽस्मिन् धनम् अत्यन्तमावश्यकम्। मनुष्यजीवनम् आगतानां विपदां समस्यानां वा निवारणाय धनस्य महत्यावश्यकतेति कारणात् निर्धना धनोपार्जनाय सततं प्रयतन्ते। धनवान् जनः श्रेष्ठकुलोत्पन्नः, शास्त्रज्ञः, दर्शनयोग्यः, बुद्धिमान् चेत्यादिस्वरूपेण विविच्यन्ते, यथा – **"यस्यास्ति वित्तं स नरः कुलीनः स पण्डितः स श्रुतवान् गुणज्ञः ......"**[9] इति।

अर्थो हि विकाररहितानीन्द्रियाणि। स्वास्थ्येन्द्रियसत्त्वेऽपि अर्थोष्मणाविरहिते पुरुषः क्षणमात्रेण भिन्नस्वरूपेण प्रतिभाति। तथाहि –

**अर्थोष्मणा विरहितः पुरुषः स एव**
**त्वन्यः क्षणेन भवतीति विचित्रमेतत्॥**[10]

सौभाग्यवशात् चारुदत्तस्य धनसम्पत्तिप्राचुर्यत्वात् सम्प्रति धनक्षयोत्पन्ना चिन्ता तं न सन्तापयति। किन्तु निर्धनस्य तस्य बान्धवा विपत्सु परित्यजन्तीति तं निरन्तरं पीडयति। निर्धनतया लज्जायाम् अपगतायां प्रभावो नश्यति येन तेजोविहीनः समाजे जनैः अवमन्यते। परिभवादात्मनि धिक्कारं प्राप्य "हा मम ईदृशी अवस्था सम्प्राप्ता" – इति शोकम् अवाप्नोति। शोकाग्रस्तस्योन्मत्तत्वात् बुद्ध्या परित्यज्य कर्तव्यज्ञानहीनत्वाद्विनाशं याति, यथा श्रीकृष्णवचनम् – **"स्मृतिभ्रंशाद्बुद्धिनाशो बुद्धिनाशात्प्रणश्यति"**[11] । अतो निर्धनता सर्वापदां कारणमेव। तथाहि निगदितम् –

दारिद्र्याद्ध्रियमेति ह्रीपरिगतः प्रभ्रश्यते तेजसो
**निस्तेजाः परिभूयते परिभवान्निर्वेदमापद्यते।**
**निर्विण्णः शुचमेति शोकपिहितो बुद्ध्या परित्यज्यते**
**निर्बुद्धिः क्षयमेत्यहो निधनता सर्वापदामास्पदम्॥**[12] इति।

**(ग) दारिद्र्यं षष्ठं महापातकम्**

**ब्रह्महत्या सुरापानं स्तेयं गुर्वङ्गणागमः।**
**महान्ति पातकान्याहुः संसर्गश्चापि तैः सह॥**[13]

इति प्राचीनभारतीयधर्मशास्त्रादिषु पञ्चमहापातकानां सत्त्वेऽपि संस्कृतसाहित्यरूपके दारिद्र्यमिति षष्ठमहापातकत्वेन परिगण्यते। दारिद्र्यात् क्षुधानिवारणार्थं मनुष्याणाम् उचितानुचितज्ञानं विलोप्यते येनानिच्छया मनुष्याः अनैतिककर्मणि प्रवर्तन्ते। महापापं यथा आध्यात्मिकपतनं घटयति जीवनञ्च नरकं परिणमयति तथा दारिद्र्यम् आत्ममर्यादां मानसिकशान्तिञ्च नाशयति।

चारुदत्तः स्वदारिद्र्यावस्थां वीक्ष्य दारिद्र्यं षष्ठं महापातकमिति परिगणयन् स्वावस्थां वर्णयति। निर्धनत्वात् कुटुम्बजनः पुरुषस्योपदेशादिकं न पालयन्ति। स्नेहशालिनो मित्रजना उदासीना भवन्ति, विपत्तयश्च वृद्धिं प्राप्नुवन्ति। धैर्यं क्षयम् अधिगच्छति, स्वभावरूपचन्द्रकान्तिः मलिनतां गच्छति। समाजे अन्यजनैः सम्पादितं चौर्यहत्यादिकं पापकर्म तत्सर्वं दरिद्रजनस्यैवेति लोकैः चिन्त्यते, तेषां प्रभावहीनत्वादिति।

किञ्च, दारिद्र्योपेतजनैः सह कोऽपि सम्पर्कं न संस्थापयति, अपितु सततम् अवज्ञयैव संलपति। पूजादिमाङ्गलिककर्मसु धनिकगृहम् आगता निर्धना धनिकैः तिरस्कारसहितेनावलोक्यन्ते। मलिनवस्त्र-धारित्वात् समृद्धजनसमूहाद्दूरे एव सङ्कोचेन तिष्ठन्ति निर्धना इत्येतादृशान् दारिद्र्यवस्थाः वर्णयन् शास्त्रप्रितपादितेषु पञ्चमहा-पातकेषु दारिद्र्यं षष्ठं महापातकमिति चारुदत्तो मन्यते। तथाह्याकूतम्–

**सङ्गं नैव हि कश्चिदस्य कुरुते सम्भाषते नादरात्**
**सम्प्राप्तो गृहमुत्सवेषु धनिनां सावज्ञमालोक्यते।**
**दूरादेव महाजनस्य विरहत्यल्पच्छदो लज्जया**
**मन्ये निर्धनता प्रकाममपरं षष्ठं महापाकतम्॥**[14] इति।

**उपसंहारः -**

दारिद्र्यं समाजस्याभिशप्तकलङ्कस्वरूपम्। न केवलम् अर्थाभावात् अपितु मर्यादापूर्णजीवनान्मौलिकाधिकाराच्च वञ्चनमेव दारिद्र्यम्। इदं न केवलं चितानां मनुष्याणां वैयक्तिकसमस्या अपितु समग्रजातेः अर्थनैतिकवाधां जनयति। साम्प्रतिककाले निर्धना मानवाः शिक्षायाः, चिकित्सायाः, सर्वकारस्य योजनायाश्च वञ्चिता भवन्ति। समाजस्य मानवा दरिद्रान् प्रति कथं दृष्टिपातं कुर्वन्ति किञ्च, स्वकीयदोषान् तेष्वारोप्य विलासबहुलपूर्णं जीवनम् अनुभवन्तीत्यत्र दरीदृश्यते। निर्धनत्वात् सद्गुणा दोषरूपेण परिगणयन्तः स्वपरिवारैः सह जीवनं पालयन्ति दरिद्राः। शूद्रकेण मृच्छकटिकमिति प्रकरणे दारिद्र्यस्य यत्स्वरूपं प्रतिपादितं तन्न केवलं चारुदत्तस्य स्वकीयं दुःखम् अपितु मानवसमाजस्य यथार्थवेदना-पूर्णस्वरूपं चित्रितम्। नालसपूर्ण-जीवनाद्व्यसनाद्वा स निर्धनतां प्राप्तः, आश्रितेभ्यो निर्धनेभ्यो धनं दत्त्वा तस्येदृशी निर्धनावस्था सम्प्राप्ता। चारुदत्तस्य दारिद्र्यसत्त्वेऽपि तस्य चारित्रे उदारता दानशीलता च न्यूना न जाता, यथा नायिकया वेश्यया वसन्तसेनया न्यासरूपेण प्रदत्तोऽलङ्कारस्तेन नापहृत इति नायकस्य सद्गुणोऽपि परिलक्षितः।

**सन्दर्भग्रन्थसूची -**

१. शूद्रकः, "*मृच्छकटिकम्*", सम्पा. अध्यापक उदयचन्द्र वन्द्योपा-ध्याय, डॉ. अनीता वन्द्योपाध्याय, कोलकाता: संस्कृत बुक् डिपो, २००७(प्रथमसंस्करणम्)।
२. कौटिल्यः, "*अर्थशास्त्रम्*", सम्पा. आर्. श्याम शास्त्री, MYSORE: PRINTED AT THE GOVERNMENT BRANCH PRESS, 1919.
३. वेदव्यासः, "*महाभारतम्*" , सम्पा. पण्डित रामनारायणदत्त शास्त्री, गोरखपुर: गीताप्रेस, सं० २०७२(पञ्चदशसंस्करणम्)।
४. विश्वनाथकविराजः, "*साहित्यदर्पणः*" , सम्पा. आचार्य कृष्ण-मोहन शास्त्री, वाराणसी: चौखम्बा संस्कृत संस्थान, २०२२(पुनर्मुद्रणम्)।
५. भर्तृहरिः, "*नीतिशतकम्*" , सम्पा. अध्यापक उदयचन्द्र वन्द्योपा-ध्याय, डॉ. अनीता वन्द्योपाध्याय, कोलकाता: संस्कृत बुक् डिपो, २०१८(प्रथमसंस्करणम्)।
६. व्यासदेवः, "*श्रीमद्भगवद्गीता*", गोरखपुर: गीताप्रेस, सं० २०८०(त्रयस्त्रिंशदुत्तरद्विशततमं पुनर्मुद्रणम्)।
७. मनुः, "*मनुस्मृतिः*", सम्पा. पण्डित गिरिराजप्रसाद द्विवेदी, लखनऊ: मुंशी नवलकिशोर सी. आई. ई., १९१७।

**सन्दर्भ**

1. कौटिल्यार्थशास्त्रस्य विनयाधिकारिके सप्तमाध्याये
2. महाभारते शान्तिपर्वणि – ८.९
3. साहित्यदर्पणः – ६.२२४
4. साहित्यदर्पणः - ६
5. मृच्छकटिकम् – १.८
6. मृच्छकटिकम् – १.१०
7. मृच्छकटिके प्रथमाङ्के
8. हितोपदेशे
9. नीतिशतकम् - ४१
10. नीतिशतकम् - ४०
11. श्रीमद्भगवद्गीता – २.६३
12. मृच्छकटिकम् – १.१४
13. मनुस्मृतिः – ११.५४
14. मृच्छकटिकम् – १.३७